# .. Whom to Fear ..

कुर्मस्तारकचर्वणं त्रिभुवनमुत्पाटयामो बलात् ।
किं भो न विजानास्यस्मान् रामकृष्णदासा वयम् ॥

क्षीणाः स्म दीनाः सकरुणा जल्पंति मूढा जना
नास्तिक्यन्त्विदंतु अहह देहात्मवादातुराः ।
प्राप्ताः स्म वीरा गतभया अभयं प्रतिष्ठां यदा
आस्तिक्यन्त्विदंतु चिनुमः रामकृष्णदासा वयम् ॥

पीत्वा पीत्वा परमममृतं वीतसंसाररागाः
हित्वा हित्वा सकलकलहप्रापिणीं स्वार्थसिद्धिम् ।
ध्यात्वा ध्यात्वा गुरुवरपदं सर्वकल्याणरूपम्
नत्वा नत्वा सकलभुवनं पातुमामंत्रयामः ॥

प्राप्तं यद्वै त्वनादिनिधनं वेदोदधिं मथित्वा
दत्तं यस्य प्रकरणे हरिहरब्रह्मादिदेवैर्बलम् ।
पूर्णं यत्तु प्राणसारैर्भौमनारायणानाम्
रामकृष्णस्तनुं धत्ते तत्पूर्णपात्रमिदं भोः ॥

-- स्वामी विवेकानन्द

Please send corrections to Sunder Hattangadi (sunderh@hotmail.com)
Last updated December 28, 1997